**सृ** गतौ भ्वादि० पर० सक० अनिट् सरति । असरत् असार्षीत् पर्युदासान्न षोपदेशः । "नालानं करिणां ससे" च रघुप्रयोगात् आत्म० । [सास्न षोपदेशः ।

**सृ** गतौ जु० वैदिकः पर०सक०सेट् । ससर्त्ति असरत् पर्युदा०

**सृक** पु० सृ-कक् । १कैरवे २वाणे उणा० । ३पद्मे ४वायौ च सि० कौ० ।

**सृकण्डु** पु० सृ-क्विप् पृषो० कर्म० कण्डुरोगे शब्दर० ।

**सृकाल** पु० सृ-कालन् कस्य नेत्वम् । शृगाले शब्दच० ।

**सृक्क(न्)** न० सृज-कन् कनिन् वा कस्य नेत्वम् । ओष्ठप्रान्तभागे "सृक्कणी परिलेढ़ि च" स्मृतिः । "महासृक्काय शोभितो व्यंसहर्वादिति" स्वभात् कान्तताप्यस्य ।

**सृक्वन्** न० सृज-क्वनिप् । ओष्ठप्रान्तभागे अमरः । पृषो० । सृक्विन् अप्यत्र अरुणः । सृक्कणी तत्रार्थे स्त्री राजनि०

**सृग** पु० सृ-गक् गस्य नेत्वम् । भिन्दिपालास्त्रे अमरः ।

**सृगाल** पुंस्त्री० सृ-गालन् गस्य नेत्वम् । १जम्बुके (शेयाल) शब्दर० । स्त्रियां ङीष् । २दैत्यभेदे हरिवं० ।

**सृज** विसर्गे त्यागे दिवा० आत्म० अनिट् सक० । सृज्यते असृष्ट । पर्युदासान्न षोपदेशः ।

**सृज** विसर्गे तु० पर०सक०अनिट् सृजति असाक्षीत् ससर्जिथ ससष्ठ स्रष्टा स्रक्ष्यति । पर्युदासान्न षोपदेशः ।

**सृजकाक्षार** पु० सृजति वर्चस्वित्वं सृज-क ततः स्वार्थे क सृजका सर्जिका कर्म० । सर्जिकाक्षारे रत्नमा० ।

**सृणि** पु० सृ-निक् । १शत्रौ शब्दमा० । २अङ्कुशास्त्रे स्त्री अमरः । तत्र वा ङीप् । सृणीत्यपि ।

**सृणि(णी)का** स्त्री सृणि+कन् ईकन् वा । लालायाम् अमरः

**सृति** स्त्री सृ-भावे क्तिन् । १गमने । करणे क्तिन् । २पथि च मेदि० । [संक्षिप्त०

**सृत्वन्** पु० सृ-क्वनिप् । १प्रजापतौ उज्ज्वल० । २विसर्पे ३बुद्धौ

**सृत्वर** त्रि० सृ-क्वरप् । १गमनकर्त्तरि स्त्रियां ङीप् । सा च २मातरि संक्षिप्तसा० ।

**सृदर** पु० सृ-अरक् दुक् च । सर्पे सि० कौ० ।

**सृदाकु** पु० सृ-काकु दुक् च । १वायौ २वज्रे ३अग्नौ ४प्रतिसूर्य्ये मेदि० । ५मृगे संक्षिप्त० । नद्यां स्त्री उणा० ।

**सृप** गतौ भ्वा० पर० सक० अनिट् । सर्पति असृपत् । पर्युदासान्न षोपदेशः ।

**सृपाट** पुंस्त्री० सृप-काटन् । १परिमाणभेदे २रक्तधारायां गोवर्द्धनः । स्त्रियां ङीप् । स्वार्थे क अत इत्त्वम् । सृपाटिका । चञ्चौ हेमच० ।

**सृप्र** पु० सृप-रक् । चन्द्रे उणा० । [२गमनशीले त्रि० ।

**सृमर** पुंस्त्री० सृ-क्मरच् । १मृगभेदे अमरः । स्त्रियां ङीष् ।

**सृष्ट** त्रि० सृज-क्त । १निर्मिते २युक्ते ३निश्चिते ४बहुले मेदि० । ५भूषिते अजयः । ६त्यक्ते च ।

**सृष्टि** स्त्री सृज-क्तिन् । १निर्माणे २स्वभावे च मेदि० कर्मणि क्तिन् । ३सृज्यमाने "या सृष्टिः स्रष्टुराद्ये"ति शकुन्तला० ४निर्गुणे शब्दर० ।

ब्रह्माण्डसृष्टिप्रकारः नानापुराणेषूक्तः तत्र मत्स्यपु० उक्तः प्रकारो यथा

"महाप्रलयकालान्त एतदासीत्तमोमयम् । प्रसुप्तमिव चातर्क्यमप्रज्ञातमलक्षणम् । अविज्ञेयमविज्ञातं जगत् स्थास्नु चरिष्णु च । ततः स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्मणाम् । व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः । योऽतीन्द्रियः परो व्यक्तादणुर्ज्यायान् सनातनः । नारायण इति ख्यातः स एकः स्वयमुद्बभौ । यः शरीरादभिध्याय सिसृक्षुर्विविधं जगत् । अप एव ससर्जादौ तासु बीजमवासृजत् । तदेवाण्डं समभवद्धेमरूप्यमयं महत् । संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम् । प्रविश्यान्तर्महातेजाः स्वयमेवात्मसम्भवः । प्रभावादपि तत् व्याप्त्या विष्णुत्वमगमत् पुनः । तदन्तर्भगवानेष सूर्य्यः समभवत् पुरा । आदित्यश्चादिभूतत्वात् ब्रह्मा ब्रह्म पठन्नभूत् । दिवं भूमिं समकरोत्तदण्डशकलद्वयम् । स चाकरोद्दिशः सर्वा मध्ये व्योम च शाश्वतम् । जरायुर्मेरुमुख्याश्च शैलास्तस्याभवंस्तदा । यदुल्वं तदभून्मेघस्तडित्सङ्घातमण्डलम् । नद्योऽण्डनाम्नः सम्भूताः पितरो मनवस्तथा । सप्त येऽमी समुद्राश्च तेऽपि चान्तर्जलोद्भवाः । लवणेक्षुसुराद्याश्च नानारत्नसमन्विताः । स सिसृक्षुरभूद्देवः प्रजापतिररिन्दम ! । तत्तेजसश्च तत्रैव मार्त्तण्डः समजायत । मृतेऽण्डे जायते यस्मान्मार्त्तण्डस्तेन स स्मृतः । रजोगुणमयं यत्तद्रूप तस्य महात्मनः । चतुर्मुखः स भगवानभूल्लोकपितामहः । येन सृष्टं जगत्सर्वं सदेवासुरमानुषम् । तमवेहि रजोरूपं महत्सत्त्वमुदाहृतम्" । मनुरुवाच "चतुर्मुखत्वमगमत् कस्माल्लोकपितामहः । कथं तु लोकानसृजत् ब्रह्मा ब्रह्मविदांवरः" । मत्स्य उवाच "तपश्चचार प्रथमममराणां पितामहः । आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः । पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् । नित्यं शब्दमयं पुण्यं शतकोटिवि-